

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.,

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY,
PRESIDENCY COLLEGE, MADRAS.

Prepared under the orders of the Government of Madras.

VOL XXIV—Jyautisa

MADRAS·

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1918

ADDENDA AND CORRIGENDA

Page	Line		
9011	6	For 1. Astronomy	Read A. Astronomy.
9020	6	„ व्याख्यासतिम्	„ व्याख्यासहितम्
9056	20	„ Telugu	„ Tamil.
9109	2	„ व्यावृतौ	„ व्याकृतौ
9148	25	Add Nakṣatranighaṇṭu 26*a*.	
9157	13	For Sthānanighaṇṭu	Read Bhāvanighaṇṭu.
9158	6	„ do.	„ do.
9159	25	„ do.	„ do.
9164	33	Add after No. 2040 "wherein this work has been mentioned as Vivāhakūṭadaśaka in the list of other works given therein."	
9165	19	For Lagnanighaṇṭu	Read Bhāvanighaṇṭu.
9167	4	Add after No. 3483 "wherein this work has been mentioned as Upanayanādhyāya in the list of other works given therein."	
9176	15	For 59*a*	Read 77*a*.
9185	25	„ Lagnanighaṇṭu	„ Bhāvanighaṇṭu.
	26	Add Rāśinighaṇṭu 22*a*.	
9186	17	For Jātakajīvana	Read Jātakajīvanavyākyā.
9189	13	Add Praśnaviṣaya 18*a*.	
9193	27	For Bhāvanighaṇṭu 8*a*	Read Lagnādhipati-phalanirūpaṇa 9*a*.
	28	Add Dvādaśabhāvaphala 19*a*.	
9197	10	For Jaiminisūtravṛtti	Read Jātakasārasaṅgraha.
	11	„ Naṣṭacintādhyāya 54*a*	„ Praśnamahōdadhi 54*b*.
	13	„ Jyōtiḥpradīpikā Jaiminisūtravyākhyā	„ Jaiminisūtra with commentary.
9198	6 & 7	„ Jaiminisūtravyākhyā · Jyōtiḥpradīpikā	„ do.
9247	27	Add Praśnaviṣaya 23*a*.	
9251	9	For Dvādaśabhāvaphala	Read Daśāphalaviṣaya.
	9	„ Ṣaṭpañcāśaddhōrāvivṛti	„ Praśnamahōdadhi with commentary.
9303	26	„ Hōrāsāra	„ Hōrāvibhūṣaṇa.
9305	32	„ Praśnabhāvaviṣaya	„ Praśnamahōdadhi.
	32	Add Praśnaviṣaya 56*a*.	
9343	15	For 13863	Read 13862.
9451	18	„ D Supplemental	„ E Supplemental.
9467	21	„ Meaning	„ Notes.

CONTENTS.

CLASS XV—JYAUTIṢA

A. Astronomy, Mathematics, etc.

CLASS XV—JYAUTIṢA- *cont.*

A. Astronomy, Mathematics, etc.—cont.

CLASS XV—JYAUTIṢA—*cont.*

A. Astronomy, Mathematics, etc.—cont.

B. Natural Astrology.

CLASS XV—JYAUTIṢA—*cont.*

C, *Horoscopy.*

CLASS XV—JYAUTIṢA—*cont.*

C Horoscopy—cont

CLASS XV—JYAUTIṢA—*cont.*

C. Horoscopy—cont.

CLASS XV—JYAUTIṢA—*cont.*

C. Horoscopy—*cont.*

D. Prognastication, Divination, etc.

CLASS XV—JYAUTIṢA—*cont.*

D. Prognostication, Divination, etc.—cont.

E. Supplemental.

CLASS XV--JYAUTIṢA—*cont.*

E. Supplemental—cont.

A DESCRIPTIVE CATALOGUE
OF THE
SANSKRIT MANUSCRIPTS
VOLUME XXIV.

CLASS XV.—JYAUTIṢA.

1. ASTRONOMY, MATHEMATICS, ETC.

No. **13382.** अगणितचारः.
AGAṆITACĀRAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 1602.

Contains the Kujaparivṛtti (which wants the beginning), the Budhaparivṛtti and the Guruparivṛtti complete and the Śukraparivṛtti incomplete.

Gives tables for arriving at certain astronomical conclusions without actual calculation in connection with the movements of the planets along the signs of the Zodiac.

Beginning:

अगणितचारः—(१) मेष, १८. क. १ वृ. २१. क १ मि. ९. तु १ सिं. ५. वृ १ कु. १८. ध १ तु. २१. म. १ ध. ९. । कु. कु. १९. मी. १. कु. ३०. मे १ मी. १९. अस्तम् ॥

(२). मे. १२. वृ १ वृ. २५. मि. १ क. १. क. १.

Colophon:

गुरुपरिवृत्तिः समाप्ता ॥

End:

शुक्रपरिवृत्तिप्रारम्भः—

(१. परिवृत्ति)—मे. ६. मी. । वृ. १२. मे. । मी. ९. वृ. । क. १. मी.
* * * *

ध. १५. म. म. १०. कुं. कु. ९. मी. २६. वृ. १.

(२. परिवृत्ति)—मे. २२. मिः

No. **13383.** अर्घकाण्डः.
ARGHAKĀṆḌAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 77*a* of the MS. described under No. 2510.

Complete.

On certain predictions to be made regarding the abundance or otherwise of crops and other things, the rise and the fall in their market prices according to certain positions occupied by the planets in a given year.

Beginning:

प्रणम्य शिरसा देवं सर्वज्ञं सर्वकामदम् ।
अर्घकाण्डं प्रवक्ष्यामि लोकानां हितकाम्यया ॥
लाभालाभौ जयन्तस्य हानिवृद्धिः प्रजायते ।
पापसौम्यग्रहास्सर्वे गच्छेयुस्तारकासु च ॥
मकरस्थे यदादित्ये चन्द्रे कर्कटकस्थिते ।
सङ्ग्रहं सर्वधान्यानां षण्मासे लाभ एव हि ॥
सप्तमे हानिवृद्धी च षष्ठे तत्क्रयविक्रयौ ।
मासे तृतीये द्विगुणं लाभं चतुर्थे हानिर्भवति ॥

End:

बुधशुक्रौ राहुशनी एकराशिगता यदि ।
तदा लाभो मौक्तिकानां चतुर्मासेन विक्रयः ॥
रविक्षेत्रे भृगुगुरू महार्घं कुरुतस्तदा ॥

Colophon:

इत्यर्घकाण्डः ॥

No. 13384. अहर्गणाद्यानयनम्.

AHARGAṆĀDYĀNAYANAM.

Substance, paper. Size, $5\frac{3}{8} \times 5$ inches. Pages, 32. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Gives details for the preparation of calendars intended for the use of the Muhammadans.

Beginning:

अहर्गणानयनं यथा—

अङ्गाङ्कुरविभिः 1296 त्यक्तं हन्यात्पारसिकं शकम् ।
सार्धाब्धिसायकगुणै 354½ र्मोहर्मात्पूर्ववासरे ॥
यौनान्यहर्गणस्सोमवारात्सूर्यास्तकालिकः ।
एकाधिकोनं वारार्धे विदध्यादर्धमेव वा ॥

तदूर्ध्वमाससङ्ख्याघ्नमर्घोनं स्वाम्रिभिर्युतम् ।
अभीष्टदिनयुक्तं च सोमवारास्तकालिकात् ॥
अहर्गणो भवेच्छुद्ध एकोनयुतमत्र च ।

End :

अस्तकालसाधनविधिः—

भोग्यासूनूनकश्चाथ भुक्तासूनधिकस्य च(?) ।
सम्पिण्ड्यान्तरलग्नासूनेवं स्यात्कालसाधनम्(?) ॥

* * * *

A table of figures is given in Telugu.

No. 13385. आर्यभटीयम्.

ĀRYABHAṬĪYAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 12. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āryabhaṭīya with commentary 7*a*.

Complete.

A well-known work on astronomy consisting of four Pādas, viz., Daśagīti, Gaṇitapāda, Kālakriyāpāda and Gōḷapāda : by Āryabhaṭa.

Beginning :

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि हयाननम् ॥
प्रणिपत्यैकमनेकं कं सत्यां देवतां परं ब्रह्म ।
आर्यभटस्त्रीणि गदति गणितं कालक्रियां गोलम् ॥
वर्गाक्षराणि वर्गेऽवर्गेऽवर्गाक्षराणि कात्ङ्मौ यः ।
खद्विनवके स्वरा नव वर्गेऽवर्गे नवान्त्यवर्गे वा ॥

* * * *

Colophon :

इत्यार्यभटीये दशगीतिसूत्रं समाप्तम् ॥
इत्यार्यभटीये गणितपादः समाप्तः ॥
इत्यार्यभटीये कालक्रियापादः समाप्तः ॥

End:

क्षितिरवियोगाद्दिनकृद्रवीन्दुयोगात्प्रसाधितश्चेन्दुः ।
शशिताराग्रहयोगात्तथैव ताराग्रहाः सर्वे ॥
सदसज्ज्ञानसमुद्रात् समुद्धृतं देवताप्रसादेन ।
सज्ज्ञानोत्तमरत्नं मया निमग्नं स्वमतिना वा ॥
आर्यभटीयं नाम्ना पूर्वं स्वायम्भुवं सदा नित्यम् ।
सुकृतायुषोः प्रणाशः कुरुते प्रतिकञ्चुकं योऽस्य ॥

No. 13386. आर्यभटीयम्.

ĀRYABHAṬĪYAM.

Substance, paper. Size, 11⅛ × 9 inches. Pages, 12. Lines, 20 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Āryabhaṭīya-vyākhyā: Bhaṭadīpikā 7*a*, Līlāvatīvyākhyā (Karmapradīpikā) 60*a*.

Complete, but wants the Kālakriyāpāda.

Same work as the above.

No. 13387. आर्यभटीयम्.

ĀRYABHAṬĪYAM.

Substance, paper. Size, 9¾ × 7½ inches. Pages, 12. Lines, 25 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol 21*a*. The other works herein are Sūryasiddhānta 1*a*, Sarvatōbhadracakra 27*a*, Purāṇasāra 31*a*.

Complete.

Same work as the above.

No. 13388. आर्यभटीयम्.

ĀRYABHAṬĪYAM.

Substance, paper. Size, 13½ × 8⅝ inches. Pages, 11. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Āryabhaṭīya with commentary 6*b*.

Same work as the above. The order of Pādas in this MS. is Kālakriyāpāda, Gaṇitapāda, Gōlapāda and Daśagītipāda.

No. 13389. आर्यभटीयम्, सव्याख्यानम्.
ĀRYABHAṬĪYAM WITH COMMENTARY.

Pages, 192. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 13385.

Complete.

Same work as the above and with a commentary by Sūryadēva called the Bhaṭaprakāśa. The date of the text is given by the commentator as Kali 3600 which corresponds to 499 A.D. when Āryabhaṭa is said to have been 33 years old.

Beginning:

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

नमः सकलकल्याण(गुण)संवासभूमये ।
निरवद्याय नित्याय महसेऽस्तु महीयसे ॥

अथ आचार्यार्यभटप्रोक्तसूत्रार्थोऽत्र प्रदृश्य(दर्श्य)ते—स्वाध्यायोऽध्येतव्य इति स्वाध्यायमधीयीतेत्यर्थज्ञानपर्यन्ताध्ययनविधानेन विहितस्याङ्गाध्ययनस्य तस्माद्ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येय इति निष्कृष्य विधानात् ।

"वेदाङ्गानि च सर्वाणि कृष्णपक्षे तु संपठेत्"

इत्यङ्गाध्ययनस्य कालविशेषस्मरणात् ।

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
मुखं व्याकरणं ज्ञेयं ज्यौतिषं नेत्रमुच्यते ॥
शीक्षा घ्राणं तु वेदस्य निरुक्तं श्रोत्रमुच्यते ।"

इत्यङ्गविशेषक्लृप्तिस्मरणेन तत्तदङ्गाध्ययनाभावे वेदपुरुषस्य तत्तदङ्गवैकल्य-दोषापत्तेश्चोपनीतैस्त्रैवर्णिकैर्वेदवदध्येतव्यतया विहितेषु षट्स्वप्यङ्गेषु

मुखमर्धं शरीरस्य सर्वं वा मुखमुच्यते ।
तत्रापि नासिका श्रेष्ठा श्रेष्ठे तत्रापि चक्षुषी ॥"

इति न्यायेन वेदपुरुस्य चाक्षुष्येण प्रधानाङ्गमवश्यमध्येतव्यं ज्योतिषामयनम् । तत्र नानाशाखासु विप्रकीर्णस्य ज्योतिर्विषयस्य वेदभागस्यार्थान् संस्मृत्यादौ भगवता ब्रह्मणा बहुविस्तरं ज्योतिश्शास्त्रं कृतम् ।

ब्रह्मणः सकाशादधिगततच्छास्त्रो वृद्धगर्गस्तत् संक्षिप्यान्यच्चकार । तस्मादपि लब्धतद्विद्याः पराशरादयो मुनयोऽप्यन्यानि ज्योतिःशास्त्राणि च चक्रुः ॥ तथा च वृद्धगर्गः—

* * * *

तत्र वराहकल्पस्यास्य सप्तमे मन्वन्तरे अष्टविंशच्चतुर्युगे अस्य कल्यादेः प्रभृति खखषड्वर्गमिते सौराब्दे गते त्रयोविंशतिवर्ष आचार्यार्यभटः पुरातनानि कालक्रियागोललौकिकगणितप्रतिपादकानि शास्त्राणि कालदैर्घ्यायत्तसंप्रदायविच्छेदग्रन्थविप्लवादिजनितैः दृग्गणितसंविवादेन किंचित्कारणान्यालोच्य समदृग्गणितज्योतिःशास्त्रं चिकीर्षन्

* * * *

ततोऽष्टाधिकशतैरार्यासूत्रैर्गणितकालक्रियागोलबीजोपयोगं दिङ्मात्रेण दर्शयामास। तदिदमार्यभटमुखारविन्दान्निर्गतं प्रबन्धद्वयात्मकं ज्योतिःशास्त्रमस्माभिर्व्याचिख्यासितम् ।

प्रणिपत्यैकमनेक (. . . .) कालक्रियां गोलम् ॥

इति । तत्र त्रीणि वस्तूनि प्रतिपाद्यतया प्रतिज्ञातानि—गणितं कालक्रियां गोलमिति ।

* * * *

एवमेतदुपदेशसहितन्यायावसेयं वस्तु सुहृद्भावेन प्रदर्शयितुमार्याष्टशतनिबन्धस्य गणितकालक्रियागोलपादात्मकस्य प्रबन्धस्यारम्भ इत्यादीन्यनुसन्धेयानि ।

एवमुपोद्धातं प्रदर्श्य शास्त्रं व्याख्यायते—

अथाचार्यार्यभटः दशगीतिसूत्रमारभमाणस्तद्विघ्नोपशान्तये भगवते स्वयम्भुवे प्रणामं कृत्वा तत्प्रतिपाद्यानि वस्तूनीत्यार्यया निर्दिशति—प्रणिपत्येति ।

कारणरूपेणैकम् । कार्यरूपेणानेकम् । सत्यां देवताम् । देव एव देवता । सत्यः पारमार्थिकः । स्वयम्भूरेव पारमार्थिको देवः । अन्ये देवास्तत्सृज्यत्वेनापारमार्थिकाः । परं ब्रह्म जगतो मूलकारणम् । एवम्भूतं कं स्वयम्भुवम् । प्रणिपत्य आर्यभटः त्रीणि गदति ब्रवीति ।

* * * *

अथ युगभगणादिसङ्ख्योपदेशसङ्क्षेपेण करिष्यन् आद्येन सूत्रेण तदुपयोगिनीं परिभाषामाह—

मू ॥ "वर्गाक्षराणि वर्गेऽवर्गेऽवर्गाक्षराणि कान्ङ्मौ यः ।
खद्विनवके स्वरा नव वर्गेऽवर्गे नवान्त्यवर्गे वा ॥" इति ।

व्या ॥ सूत्राण्यविभक्तिनिर्देशबाहुल्यात्पदविभागं प्रदर्श्य व्याख्यायते । वर्गाक्षराणि । वर्गे । अवर्गे । अवर्गाक्षराणि । कात् । ङ्मौ । यः । खद्विनवके । स्वराः । नव । वर्गे । अवर्गे । नवान्त्यवर्गे । वा ।

ककारादिमकारपर्यन्तानि पञ्चविंशतिः वर्गाक्षराणि । यकारादिहकारपर्यन्तानि अष्टाववर्गाक्षराणि । सङ्ख्याविन्यासस्थानेषु विषमस्थानानि वर्गसंज्ञानि । समस्थानानि अवर्गसंज्ञानि । ततोऽयमर्थः—वक्ष्यमाणेषु गीतिसूत्रेषु यानि सङ्ख्याप्रतिपादकानि वर्गाक्षराणि तानि इत्यर्थः ।

End:

मू ॥ आर्यभटीयं नाम्ना पूर्वं स्वायम्भुवं सदा नित्यम् ।
सुकृतायुषोः प्रणाशः कुरुते प्रतिकञ्चुकं योऽस्य ॥

व्या ॥ पूर्वस्मिन् काले स्वायम्भुवादुद्धृत्य नरलोकप्रकाशितत्वात् स्वायम्भुवम् । अत एव सदा नित्यम् ।

* * * *

इति पञ्चाशं सूत्रम् ॥

एवं गोलपादोऽप्युपदेशतो व्याख्यातः ॥

अत्र गणितपादे त्रयस्त्रिंशत्सूत्राणि । कालक्रियापादे पञ्चविंशतिः । गोलपादे पञ्चाशत् । एवमष्टोत्तरशतमस्मिन् प्रबन्धे । पूर्वस्मिन् प्रबन्धे त्रयोदश । एवं सूत्राण्येकविंशत्युत्तरं शतम् । अतीन्द्रियार्थदर्शिना आचार्येण प्रणीतम् । एतानि च दिङ्मात्रेण मया व्याख्यातानि ।

एतेषामेकैकस्य सूत्रस्य ग्रन्थसहस्रेणापि निरवशेषार्थप्रतिपादनं कर्तुं(न) शक्यते ॥

Colophon:

इति सूर्यदेवविरचितायामार्यभटीयव्याख्यायां गोलपादः समाप्तः ॥

आर्यभटीयं सव्याख्यं समाप्तम् ॥

No. **13390.** आर्यभटीयम्, सव्याख्यानम्.

ĀRYABHAṬĪYAM WITH COMMENTARY.

Substance, paper. Size, 11 × 8⅜ inches. Pages, 242. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Complete.

Same work and commentary as the above.

No. **13391.** आर्यभटीयम्, सव्याख्यानम्.

ĀRYABHAṬĪYAM WITH COMMENTARY.

Pages, 132. Lines, 22 on a page.

Begins on fol. 6*b* of the MS. described under No. 13388.

Incomplete.

Same work as the above, with short notes here and there.

No. **13392.** आर्यभटीयम्, सव्याख्यानम्.

ĀRYABHAṬĪYAM WITH COMMENTARY.

Substance, paper. Size, 13½ × 8¼ inches. Pages, 123. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Breaks off in the 35th stanza of the third chapter.

Same work as the above and with the following additional stanza given in the beginning :—

त्रिस्कन्धार्थविदा सम्यक् सूर्यदेवेन यज्वना ।
संक्षिप्यार्यभटप्रोक्तसूत्रार्थोऽत्र प्रकाश्यते ॥

No. **13393.** आर्यभटीयम्, सव्याख्यानम्.

ĀRYABHAṬĪYAM WITH COMMENTARY.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 254. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

Same text and commentary as the above, but with the addition of a summary of Sūryadēva's commentary given by Yallaya, son of Śrīdhara and pupil of Sūryadēva, son of Bālāditya.

Beginning :

(ब्रह्मकुशशिबुधभृगुरविकुजगुरुकोणभगणान् नमस्कृत्य) ।
आर्यभटस्त्विह निगदति कुसुमपुरेऽभ्यर्चितं ज्ञानम् ॥

ब्रह्मा स्वयम्भूः । कुः पृथिवी । शशी चन्द्रः । बुधस्सौम्यः । भृगुश्शुक्रः । रविस्सूर्यः । कुजो भौमः । गुरुर्बृहस्पतिः । कोणश्शनिः । भगणो नक्षत्रगणः ।

* * * *

प्रचुरतरशब्दशास्त्रविदा सूर्यदेवेन यज्वना कृतस्य व्याख्यानस्य सङ्क्षेपत्वात् आर्यभटोक्तगणितकालक्रियागोलपादार्थान् ज्ञातुमिच्छता दैवज्ञानामुपकाराय यस्य यस्य सूत्रस्य सूर्यदेवेन यज्वना यद्व्याख्यानं कृतं तस्य तस्य आर्यासूत्रस्य तत्कृत्स्नं व्याख्यानं लिखित्वा यत्र यत्र व्याख्यानसङ्क्षेपं तत्र बहुपाटीगणितग्रन्थविस्त्रिस्कन्धार्थविदा श्रीमच्चन्द्रशेखरवरविलब्धवाग्विभवेन श्रीधरार्यस्य पुत्रेण श्रीबालादित्यसुतसूर्याचार्यशिष्येण श्रीयल्लयाख्येन विपश्चिता मया व्याख्यानमपि किञ्चिदधिकमुदाहरणान्तराणि च क्रियन्ते ।

अत्र वर्गे उदाहरणान्तराणि—

एकादीनां नवान्तानां वर्गानेतान् पृथक् पृथक् ब्रूहि ।
शतपादस्य च वर्गं शतस्य तेनैव युक्तस्य ॥

विन्यासः । १, २, ३, ४, ५, ६, ७, ८, ९ ॥ शतपादः २५, सपादशतम् १२५.

End:

अतः स्वयम्भुवः प्रसादकृतस्यास्य प्रतिबिम्बं यः करोति तस्य सुकृता-(यु)षोः प्रणाशो भवति । एवं देवतानुग्रहमिदं शास्त्रं दृष्ट्वा आत्मीयबुद्धिगन्धात् यथाकरणमात्रं यः करोति तस्य स्वयम्भुवः अपचारान्(त्)सुकृतं च आयुश्च क्षीयते । शास्त्रं त्वर्थाधिक्याभावाज्जनातिन प्रदत्ते(?) । तत्र स्वयम्भूप्रसादकृतमिदमेव शास्त्रं सर्वजगत्सु प्रथितमिति प्रसिद्धम् ॥

एवं पञ्चाशत्सूत्रम् । एवं गोलपादो व्युद्देशितो व्याख्यातः ।

अत्र गणितपादे त्रयस्त्रिंशत्सूत्राणि । कालक्रियापादे पञ्चविंशतिसूत्राणि ॥ गोलपादे पञ्चाशत् । एवमष्टोत्तरशतमस्मिन् प्रबन्धे । पूर्वस्मिन् प्रबन्धे त्रयोदश । एवं सूत्राणामेकविंशत्युत्तरशतम् ॥ अतीन्द्रियार्थदर्शितमाचार्येण प्रणीतम् । एतानि च अतीन्द्रियार्थानि मया व्याख्यातानि । एतेषामेकैकस्य सूत्रस्य ग्रन्थसहस्रेणापि निरवशेषार्थप्रतिपादनमशक्यम् ॥

यथोक्तं सर्वज्ञेन भाष्यकृता—

"अतीन्द्रियार्थप्रतिपादकानि सूत्राण्यमून्यार्यभटोदितानि ।
तेषामशक्यार्थशतांशकोऽपि वक्तुं कुतोऽस्मत्सदृशैरशेषः ॥" इति ॥

अतोऽनेन ग्रन्थेन सूत्रार्थशरीरानिर(वं)शेषाः इति ज्ञेया इति ॥

Colophon:

इति श्रीसूर्यदेवेन यज्वना विरचितार्यभटप्रकाशस्समाप्तः ॥

इति श्रीमच्चन्द्रशेखरवरलब्धवाग्विभवेन श्रीबालादित्यसुतसूर्याचार्यशिष्येण श्रीधराचार्यपुत्रेण यल्लयाख्येन विपश्चिता आर्यभटोक्तगोलपादस्य किञ्चित्तात्पर्यव्याख्यानं कृतम् ॥

No. 13394. आर्यभटीयम्, भटदीपिकाव्याख्यासहितम्.

ĀRYABHAṬĪYAM WITH THE COMMENTARY OF BHATADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 132. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same text as the above, but with a commentary by Paramādīśvara, called Āryabhaṭadīpika.

Beginning:

यत्तेजः प्रेरयेत्प्रज्ञां सर्वस्य शशिभूषणम् ।
मृगटङ्काभयेष्टाङ्कं त्रिणेत्रं तमुपास्महे ॥
लीलावती भास्करीयं लघु चान्यच्च मानसम् ।
व्याख्यातं शिष्यबोधार्थं येन प्राक्तेन चाधुना ॥
तन्त्रस्यार्यभटीयस्य व्याख्याल्पा क्रियते मया ।
परमादीश्वराख्येन नाम्ना तु भटदीपिका ॥

तत्रायमाचार्यार्यभटो विघ्नोपशमनार्थं स्वेष्टदेवतानमस्कारं प्रतिपाद्य वस्तुकथनं च निरूपयति—

मू ॥ प्रणिपत्यैकमनेकं कं सत्यां देवतां परं ब्रह्म ।
आर्यभटस्त्रीणि ग(द)ति गणितं कालक्रियां गोलम् ॥" इति ॥

व्या ॥ कं ब्रह्माणम् । एकं कारणरूपेणैकम् । अनेकं कार्यरूपेणानेकम् । सत्यां देवताम् । देव एव देवता । स्वयम्भूरेव पारमार्थिको देवः । अन्ये तेन सृष्टा इत्यपारमार्थिकाः । परं ब्रह्म जगतो मूलकारणम् । त्रिमूर्त्यतीतं सर्वव्याप्तं ब्रह्म स्वयम्भूरित्युक्त्या भवति । आर्यभटः एवं ब्रह्माणं प्रणिपत्य गणितं कालक्रियां गोलम् इत्येतानि त्रीणि वस्तूनि निगदति ॥

* * * *

अथोपदेशाव(ग)म्यान्युगभगणादीन् सङ्क्षेपेण प्रदर्शि(र्शयि)तुं दशगीतिकासूत्रं करिष्यन् तदुपयोगिनीं परिभाषामाह—

मू ॥ "वर्गाक्षराणि वर्गेऽवर्गेऽवर्गाक्षराणि काङ्मौ(न्मौ) यः ।

खद्विनवके स्वरा नव वर्गेऽवर्गे नवान्त्यवर्गे वा ॥" इति ।

व्या ॥ वर्गाक्षराणि वर्गे ककारादीनि मकारान्तानि वर्गाक्षराणि तानि वर्गस्थाने एकशतायुताद्योज्यस्थाने स्थाप्यानि । एवं क्रमेण सङ्ख्या वेद्या ॥

End:

अस्य शास्त्रस्य (यः) प्रतिकञ्चुकं कुरुते दोषोत्पादनेन तिरस्करणमित्यर्थः । तस्य सुकृतायुषोः प्रणाशः स्यात् ॥

Colophon:

परमादीश्वराख्येन क्रियते [आर्य]भटदीपिका ।

प्रदीप्यतां सदा ज्योतिश्शास्त्रज्ञानं हृदालये ॥

इति भटदीपिकायां गोलपादः ॥ आर्यभटीयं समाप्तम् ॥

The scribe adds—

तिण्डवनन्तालुकाताशीस्दारानदेशिकार्यस्य ।

सूनो रङ्गार्यस्य प्रीत्यै श्रीवासराघवेणायम् ॥

आर्यभटीयो व्याख्यासहितस्संलिख्य दत्त इष्टेन ।

देशाच्चोलाच्छामाशास्त्रिप्रवराच्च मातृकां लब्ध्वा ॥

राक्षसाब्दे भाद्रपदमासे प्रादात्समालिखन् ।

श्रीवासराघवो मित्रो(त्रं)रङ्गार्यप्रीतिवृद्धये ॥

येरयनूर् श्रीनिवासराघवेणापसर्जितम् ।

कोमाण्डूर् रङ्गार्यमनोविजृम्भणमपेक्षता ॥

No. 13395. आर्यभटीयम्, भटदीपिकाव्याख्यासहितम्.

ĀRYABHAṬĪYAM WITH THE COMMENTARY BHAṬADĪPIKĀ.

Pages, 106. Lines, 20 on a page.

Begins on fol. 7*a* of the MS. described under No. 13386.

Complete.

Same work as the above.

The former owner of the MS. is said to be Bālakūmāra and it is said to have been copied by his disciples.

No. 13396. उपरागक्रियाक्रमः.
UPARĀGAKRIYĀKRAMAḤ.

Substance, paper. Size, $7\frac{1}{2} \times 4\frac{1}{2}$ inches. Pages, 16. Lines, 35 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Sūryasiddhāntasubōdhinī 13*a*, Navagrahapadakas 9*a* and 20*a*.

A work laying down the method of knowing the time of occurrence of solar and lunar eclipses, etc: by Nārāyaṇa who worships Skanda, Gaṇēśa and Sarasvatī.

Contains the following Adhyāyas :—

१. पर्यन्तविषय.
२. सोमग्रहणादाय.
३. सूर्यग्रहणादाय.
४. आदायविषय.
५. व्यतीपातग्रहमौढ्यावबोधः.

Date of transcription : Tuesday, the 13th day of the dark fortnight of the Vaikāśi month in the year Śukla.

Beginning :

गुरुपादाम्बुजं स्कन्दं गणेशं च सरस्वतीम् ।
नत्वा विलिख्यतेऽस्माभिरुपरागक्रियाक्रमः ॥
संपर्कार्धाद्यदा न्यूने विक्षेपे केवले यदा ।
भूच्छायां प्रविशेदिन्दुः पक्षान्ते केवले तदा ॥
संपर्कादिलतो न्यूने विक्षेपेऽनतिसंस्कृते ।
मासान्ते कृतलम्बेऽर्के स्वोर्ध्वगं छादयेद्विधुः ॥
ज्ञात्वा प्रायिकपर्यन्तं विधुवाक्यध्रुवादिना ।
ततः सूर्योदयेऽस्ते वा नयेत्पातेन्दुभास्करान् ॥

* * * *

Colophon :

इत्युपरागक्रियाक्रमे नारायणविरचिते पर्यन्तविषयः प्रथमोऽध्यायः ॥

End :

तुलामेषादितस्स्वन्यां(?) चरप्राणकलान्तरम् ।
युग्मौजपदयोस्स्वन्यां(?) व्यस्तमस्तमये चरम् ॥
एवं कृतार्कग्रहयोर्भागैरन्तरसम्भवैः ।
दृश्यादृश्यावबोधं तु सम्यगेव भवेत्तदा ॥

Colophon:

गुरुपादाम्बुजध्यानाच्छुद्धान्तःकरणेन वै ।
नारायणेन रचितमु(उ)परागक्रियाक्रमम्(:) ॥
इति व्यतीपातग्रहमौढ्यावबोधविषयः पञ्चमोऽध्यायः ॥

No. 13397. करणपद्धतिः.
KARAṆAPADDHATIḤ.

Substance, paper. Size, $8\frac{1}{8} \times 6\frac{5}{8}$ inches. Pages, 10. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 101*b*. The other works herein are Grahalāghava 1*a*, Grahasphuṭa 87*a*, Pañcāṅgavākya 89*a*, Pañcāṅgagaṇita 94*a*, Pañcāṅganirṇayakaumudī 107*a*.

Contains the first four Adhyāyas.

Same work as that described under R. No. 1310 of the Triennial Catalogue of MSS., Vol. II, Part I.

No. 13398. करणप्रकाशः.
KARAṆAPRAKĀŚAḤ.

Substance, paper. Size, $8\frac{1}{8} \times 6\frac{1}{2}$ inches. Pages, 80. Lines, 34 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in the following nine Adhyāyas :—

1. Madhyādhikāra.
2. Sphuṭādhikāra.
3. Tripraśnādhikāra.
4. Candragrahaṇādhikāra.
5. Parilēkhanādhikāra.
6. Sūryagrahādhikāra.
7. Udayāstamayādhikāra.
8. Śṛṅgōnnatyadhikāra.
9. Yuddhādhyāya.

But the summing up at the end omits Parilēkhanādhikāra and counts only eight Adhyāyas. Reasons for the rule of operation and illustrations are added.

A work on astronomy by Brahmadēva, son of Śrīcandrabudha, dealing with the method of calculating the time of eclipses. The author says that he has followed Āryabhaṭa.

Beginning:

ब्रह्माच्युतत्रिनयनार्कशशाङ्कभौमसौम्येज्यशुक्रशनिवागधिपा[न्] गणेशान् ।
नत्वाहमार्यभटशास्त्रसमं करोमि श्रीब्रह्मदेवरचितः(गणकः) करणप्रकाशः(म्) ॥

अहर्गणानयनम्—

(मू) शाकश्शक्रदशो १०१४ नितो रविगुणश्चैत्रादिमासान्वितो
द्विष्ठो दस्रहतो द्विरामसहितोऽथो भूपनन्दैः ९१६ हृतः ।
लब्धोनो विहृतश्शिलीमुखरसै ६५ राप्ताधिमासैर्युतः ॥

(व्या) स्पष्टोऽर्थः । अत्रोपपत्तिः । त्रैराशिकेन यदि युगरविमासैरेभिः ५१८४२००० युगाधिमासा एते १५९३३३६ लभ्यन्ते तदेभिः खण्डवर्षैः किमिति अत्र लाघवार्थमधिमासार्धेनानेन ७९६६६८ गुणकभाजकावपवर्तिते जातं गुणकस्थाने द्वयम् २ हारस्थाने पञ्चषष्टिः । किञ्चिदधिका ६५-२-७-९० सावयवाः ।

* * * *

उदाहरणम्—

एतत्कोशलेखनसमयरक्ताक्षिनामसंवत्सरस्य शालीवाहनशकः १७८६ अस्मिन् शक्रदश १०१४ विशोध्य शेषध्रुवाब्दाः ७७२ रविगुणितः ९२६४ चैत्रशुक्लप्रतिपद्गुरुवारस्यैव चिकीर्षितत्वात् गतमासाः ० अतो(तः) शुद्धमासाः ९२६४। अयं द्विधा स्थापितः ९२६४ द्विगुणितः अयं १८५२८ द्विरामैः ३२ युक्तः जातं १८५६० अयमपि द्विस्थः १८५६० एतद्भूपनन्दैः ९१६ भक्तं लब्धं २० अनेन ऊनः ऊर्ध्वराशिः १८५६० शेषमिदं १८५४० अयं पञ्चषष्टिभिः भक्तं लब्धं अधिकमासाः २८५ शेषं १५ लब्धमधिकमासैः पूर्वमासाः ९२६४ शुद्धमासाः ९५४९.

अवमानयनम् ॥

(मू) खत्रि ३० घ्नस्सतिथिर्द्विधाकररसैर्युक्तस्ततोऽधः कृतः ॥
विलोचनघ्नश्शिखवेदभू १४०३ हृतः फलान्वितस्सागरषड्भिरुद्धृतः ।
फलावमोनो भृगुवारपूर्वको भवत्ययं रव्युदयादहर्गणः ॥

End:

समकलयोर्ग्रहयोरुदयाय स्फुटमनयोरुदयास्तमयेन ।
न भवति येन नतिग्रहभेदास्सति दिनकरतो लम्बनपुच्छम् ॥

ग्रन्थनिगमनक्रममाह—

आसीत्प्रार्थितवृन्दवन्दितपदाम्भोजद्वयीमाधुरः
श्रीश्रीचन्द्रबुधो गुणैकवसतिः ख्यातो द्विजेन्द्रः क्षिता ।

नत्वा तस्य सुतः पदाम्बुजयुगं खण्डेन्दुचूडामणेः
वृत्तैः स्पष्टमिदं जगाद करणं श्रीब्रह्मदेवस्सुधीः ॥

* * * *

ग्रन्थसङ्ख्याः—

मध्याधिकारे गिरिचन्द्र १७ वृत्ताश्शुद्धा(स्फुटा)धिकारे नभराम ३० वृत्ताः।
छायाधिकारे गतिचन्द्र १४ वृत्ताः चन्द्रग्रहे पञ्चदश १५ प्रवृत्ताः ॥
सूर्यग्रहे वेदशशाङ्कवृत्ताः १४ खेटोदयास्ते खलु नाग ८ वृत्ताः ।
शृङ्गोन्नतौ चन्द्रमसोऽष्ट वृत्ता ८ युद्धे खगानां गुणचन्द्र १३ वृत्ताः ॥
अष्टाध्यायेषु संभूय वृत्तसङ्ख्या नवेश्वराः ११९ ॥
ब्रह्मदेवेन रचिताश्चार्यभट्टस्य सम्मताः ॥ १२० ॥

The scribe adds—

शराङ्गतान ४९६५ संमिते कलौ शके रसेभरा-
गचन्द्रके १७८६ समालिखत्सुफाल्गुने सिते दले ।
दशम्युते १० सिते दिने तडकमल्लकृष्णले-
खकः सतां मुदेऽन्ध्रलिप्युतं सुतन्त्रमीक्ष्यतम् ॥
रुधिरोद्गारिवर्षेऽस्मिन् फाल्गुने शुक्रवासरे ।
कृष्णे दशम्यां करणप्रकाशं पूर्णमभ्ययात् ॥

No. 13399. करणप्रकाशः, कर्णाटकटीकासहितः.

KARANAPRAKĀŚAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 11 × 1¼ inches. Pages, 116. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 52*a*. The other work herein is Vākyakaraṇa 1*a*.

Contains the following Adhyāyas written in disorder :—

Sōmagrahaṇādhikāra.
Sūryagrahaṇādhikāra.
Madhyagrahādhikāra.
Sphuṭādhikāra.
Chāyādhikāra.

Same work as the above.

No. 13400. कुजादिपञ्चग्रहवाक्यम्.

KUJĀDIPAÑCAGRAHAVĀKYAM.

Substance, palm-leaf. Size, 7¾ × 1⅓ inches. Pages, 50. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 43*a*. The other works herein are Brahmasūtrabhāṣya 1*a*, Vākyakaraṇadīpikā 9*a*.

Complete.

Deals with certain calculations useful for ascertaining the position of the planets Kuja (Mars), Budha (Mercury), Guru (Jupiter), Śukra (Venus), Śani (Saturn).

Beginning:

कुजस्य वाक्यम्—

मङ्गलश्री भूसूनुः ॥ ४० ॥
आत्मजयी शन्तनुः ॥ ८० ॥ उदि ॥
इष्टो भूपतिर्वो नः ॥ १२० ॥
ईशाङ्गनासम्पन्नः ॥ १५० ॥
भूमिर्गिरिसंलग्ना ॥ १८० ॥

End:

चण्डा शत्रुसंसत् ॥ ३१८ ॥
नीरदो रसेच्छुः ॥ ३४८ ॥
रविगोनिर्दासः ॥ ३७८ ॥
वाक्यम् १९ घरिश्शनेः ॥
शनिवाक्यं समाप्तम् ॥

Colophon:

कुजादिपञ्चग्रहवाक्यं परिसमाप्तम् ॥

No. 13401. कुजादिपञ्चग्रहवाक्यम्.

KUJĀDIPAÑCAGRAHAVĀKYAM.

Substance, palm-leaf. Size, 8 × 1¹ inches. Pages, 83. Lines, 10 on a page. Character, Grantha and Tamil. Condition, much injured. Appearance, old.

Begins on fol. 38*a*. The other works herein are Pañcāṅgavākya 1*a*, Vākyagaṇita (with Tamil meaning) 8*a*, Ravyādijyāvākya 28*a*, Parahitagaṇita 80*a*.

Complete.

Same work as the above.

No. 13402. कुजादिपञ्चग्रहवाक्यम्.
KUJĀDIPAÑCAGRAHAVĀKYAM.

Substance, paper. Size, $9\frac{1}{2} \times 6$ inches. Pages, 92. Lines, 24 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 27*a*. The other works herein are Pañcāṅgavākya 1*a*, Vākyagaṇita (with Tamil meaning) 6*b*, Ravyādijyāvākya 21*a*, Parahitagaṇita 72*b*.

Complete.

Same work as the above.

No. 13403. क्षेत्रगणितम्.
KṢĒTRAGAṆITAM.

Pages, 15. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 3120.

Complete.

A work in mensuration: by Gaṇēśa, son of Śrīdhara and a resident of Nandigrāma.

Date of copying: Tuesday, the 14th day of the dark fortnight of the Āśvina month in Samvat 1894, Vikrama.

Beginning:

श्रीगणेशं महालक्ष्मीं नत्वा कुर्वे समासतः ।
गणेशाभिधदैवज्ञः कुण्डसिद्धेरुदाहृतिम् ॥

द्विघ्नन्यासमिति दर्शनम् । क्षेत्रफलमेकहस्तमधिकृत्योच्यते । तत्र 'समश्रुतौ तुल्यचतुर्भुजे च तथायते तद्भुजकोटिघाते' इति भास्करोक्त्या प्रकृते समश्रुतितुल्यचतुर्भुजस्यास्य भुजकोटी २४, २४. अनयोर्घाते भुजवर्ग एव (परि)णमति । अतस्तुल्यचतुर्भुजे भुजवर्ग एव क्षेत्रफलमिति तात्पर्यार्थः ।

End:

लम्बेन निघ्नं कुमुखैक्यखण्डमित्यादिना जातं क्षेत्रफलम् ५०, २. ९, ८. एतदेवापरविषमचतुर्भुजस्यातो द्विघ्नमेतत् २००, ४. ३. पूर्वानीतायतचतुर्भुजफलेन युतं जातं क्षेत्रफलम् ५७६, ४. ३.

Colophon:

गणेशः श्रीधरसुतो नन्दिग्रामनिवासकः ।
सुबोधार्थं क्षेत्रविदामकरोद्गणितं स्फुटम् ॥

No. 13404. क्षेत्रतत्त्वप्रदीपिका.
KṢĒTRATATTVAPRADĪPIKĀ.

Substance, paper. Size, $8 \times 6\frac{1}{4}$ inches. Pages, 108. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Bījagaṇita 1*a*, written from the right side of the book.

Complete in five Prakāśas.

This work purports to be a Sanskrit rendering by Yōgadhyānamiśra of Huttons' Euclidian geometry. The rendering is said to have been made at the instance of a German named Triyar who was the officer in charge of a library at Calcutta.

Beginning:

श्रीक्षेत्रतत्त्वप्रदीपिकानामकः रेखाग्रन्थप्रारम्भः ।
कलिगतम् ४९७९ भावनामसंवत्सरकार्त्तिकशुक्लेतरनवमीबुधवासरे कृतः ॥

यत्कान्त्या कान्तिमन्तः सुरसरणिचरा भूर्भुवस्स्वःप्रकाशा
यद्भ्रान्त्या सम्भ्रमन्ति प्रवहपदसमालम्बिनो मूर्तिभाजः ।
यद्भ्रूभङ्गक्षणेन स्थितिजननलयाः संविभूतेर्गुणानां
तद्रूपं मे हृदब्जे विकसतु सततं सच्चिदानन्दमाद्यम् ॥
इङ्गुण्डीयकुलावतंसविबुधग्रामाभिरामाग्रणीः
श्रीहट्टंससमाह्वयो व्यरचयद्ग्रन्थं स्वनामाभिधम् ।
रेखाख्ये गणिते स्वदेशवचसा तं देववाण्याधुना
वक्ष्ये विज्ञमुदे सहायमवलम्ब्योवेष्टनं साहवम् ॥

तत्रादौ परिभाषा—
यः पदार्थो लक्षयितुं शक्यः परिमाणस्थूलत्वदैर्घ्यविस्ताररहितः स बिन्दुः ।
यः पदार्थो दीर्घो विस्तारस्थूलत्वाभ्यां रहितः स रेखाशब्दवाच्यः ।
यः पदार्थो विस्तारदैर्घ्ययुक्तः स्थूलत्वरहितः स धरातलशब्दवाच्यः ।
यः पदार्थो विस्तारदैर्घ्यस्थौल्ययुक्तस्स एव स्थूलपदार्थः ।
अथ रेखा त्रिविधा—सरला, वक्रा, मिश्रा च ॥

* * * *

अथ प्रमेयोपपाद्यम् । तत्र प्रथमं त्रिभुजद्वये एकस्य त्रिभुजस्य भुजद्वयं तदन्तर्गतकोणः अन्यत्रिभुजस्य भुजद्वयेन तदन्तर्गतकोणेन यदि समानः, तदा ते द्वे त्रिभुजे समाने भवतः ॥

* * * *

Colophon:

इति श्रीक्षेत्रतत्त्वदीपिकायां प्रमेयोपपाद्ये प्रकाशः द्वितीय(प्रथमः) ॥
एकोनचत्वारिंशत्तमम् ।


End:

तत्र कल्पित(क-ख-ग-घ)समकोणायतचतुर्भुजसमानं वर्गक्षेत्रं कर्तव्यमस्ति ।

तद्यथा—तच्चतुर्भुजस्य(क-ख)भुजः तथा वर्धनीयः यथा(ख-ङ)वर्धितभागः(ख-ग)भुजतुल्यः स्यात् । (क-ङ)रेखां व्यासं कृत्वा वर्धित(ख-ग)रेखायाः (च)चिह्नगतं वृत्तं कार्यम् । तदा(ख-च)रेखाकल्पित(ख-घ)समकोणायतचतुर्भुजेन तुल्यस्य ईप्सित(ख-च-छ-झ)समकोणसमचतुर्भुजस्य भुजो भविष्यति ॥

(८७) .)(७७) इदमेवेष्टम् ॥

३२



ख्यातो जर्मनिजातिजीवनजनिप्रोल्लासने भास्करः
श्रीमान् ट्रीयरसाहेबोऽत्र कलिकातायां गिरागारपः ।
श्रीहट्टंसकृतौ स्थितं सुगणितं रेखाभिधं यत्परं
तद्गीर्वाणवचोनिरूपणविधावाज्ञप्तवान् मां पुरा ॥
श्रीयोगध्यानमिश्रो व्यरचयदमलां क्षेत्रतत्त्वप्रबोधे
सत्पात्रे स्नेहपूर्णां सुगणितरचनावर्तिकां चित्ररूपाम् ।
रेखाविज्ञानवेश्मद्युतिनिचयकरीं तद्भवाज्ञानजाल-
ध्वान्तघ्नीं तन्मदान्धप्रमदशलभहां दीपिकां विज्ञतुष्ट्यै ॥

Colophon:

इति श्रीक्षेत्रतत्त्वदीपिकायां वस्तूपपाद्यं नाम पञ्चमः प्रकाशस्समाप्तः ॥

समाप्तं चेदं प्रकरणम् ॥

The scribe adds—

भावनामसंवत्सरमाघशुक्लपञ्चमीबुधवासररेवतीनक्षत्रदिवसमध्याह्ने एतत्कोशलिखितं सम्पूर्णं हारीतकृष्णरायेण ॥

No. 13405. खेटतन्त्रम्, आन्ध्रटीकासहितम्.

KHĒṬATANTRAM WITH TELUGU MEANING.

Substance, palm-leaf (Śrītāla). Size, 10½ × 2¼ inches. Pages, 42. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance new

Contains the following Adhikāras :—

२. ग्रहमध्याधिकारः (colophon only).
३. स्फुटाधिकारः.
५. वैधृत्यादिनिरूपणम्.
६. चन्द्रग्रहणाधिकारः.
७. सूर्यग्रहणाधिकारः.

A work in astronomy by Nandisūri with Telugu meaning.

Colophon :

इति नन्दिसूरिविरचिते खेटतन्त्रे ग्रहमध्यगत्याधिकारो नाम द्वितीयोऽध्यायः ॥

अथ स्फुटाधिकारं वक्ष्ये ॥ . . . .

द्व्यमद्रिभुवः कला रवेः ॥ . . . .

क्षितिसूनोः श्रुतयो दिशो यमौ ॥ . . . .

तुरगा दशतारका विद ॥ . . . .

पवना भूमियमानखा गुरोः ॥ . . . .

भृगुजस्य यमौ नवेन्दवः ॥ . . . .

मुनयोऽङ्ग्यमान . . . . . . ॥ . . . . . . :

मृदुतुङ्गा भवनादय(:) स्मृताः ॥ . . . .

End :

अर्धादूने स धूम्रं स्यात्कृष्णमर्धाधिकं भवेत् ।
विमुञ्चतः कृष्णताम्रं कपिलं सकलं ग्रहे ॥

Colophon :

इति नन्दिसूरिविरचिते खेटतन्त्रे सूर्यग्रहणं नाम अष्टमोऽध्यायः ॥

रविमन्दपदकानि लिख्यन्ते—

१. २. २०. २. २०. २. १८.
२. ४. ४०. २. १९. २. १७.
३. ६. ५९. २. २०. २. १७.
४. ९. १९. २. १८. २. १७.

* * * *

२३. ४५८. अ. १. ग. ०. ०.
२४. ४६९. अ. ०. ग. ०. ०.

शनिमान्दं समाप्तम् ॥

रवेर्लक्षपदकम्—

लक्ष, तस्मै मान्यो न काली ॥
अयुतम्, तुङ्गो यज्ञस्तुल्यो भानुः ॥
सहस्र, अयं तुङ्गो शूरो हि ॥
शत, सङ्गगङ्गा हि नीला ॥
दश, रुद्रपशूधनज्ञः ॥
एकपदम्, जनेधर्मः ॥
गतध्रुवम्, दीरोधारोखरपुण्यम् ॥

* * * *

राहो(ः)—

लक्ष, पुरा भर्गो हि स्कन्दः ॥
अयुतम्, चन्द्र . . . . . . ॥
सहस्र, धनी धर्मोक्रूरोऽयम् ॥
शत, शशी सेव्यो मे ॥
दश, सेवा कलौ ॥
एक, पुण्याङ्गः ॥
गतध्रु, तुङ्गागोमेगिराहिनो ॥

No. **13406.** खेटतन्त्रम्, आन्ध्रटीकासहितम्.

KHĒṬATANTRAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18½ × 1⅝ inches. Pages, 20. Lines, 7 on a page. Character, Grantha and Telugu. Condition, good. Appearance, new.

Begins on fol. 3*a*. The other works herein are Saṁvatsaradaśāphala 1*a*, Mantrapraśna 13*a*.

Wants the beginning and the end.

Similar to the above. There is no authority for the name given to this work excepting that it is so stated in the top of the MS.

Date: 1747 to 1807 A.D.

Beginning:

षष्टिरेक + (षष्टिरेकविंशतिगुणितं व्यपगतसंवत्सरेण सं) मिश्रम् ।
नवगगनाब्धिसमेतं शक(नृपकालं विजानीयात् ॥)

शकाब्दं नवशैलेन्दुगुणयुक्कलिवत्सराः ।
शाको वेदाद्रिविश्वानो मासघ्नो मासयुक् त्रिधा ॥
नताहियुक्तस्तुत्याधिलब्धहीनोऽष्टसंयुतः ।
द्विघ्नो मातासंयुक्तः दिनीकृत्यो दिनान्वितः ॥

* * * *

तदावाप्तफलं योज्यं ज्याखण्डे गतसंज्ञिकाः ।

ग्रहशोध्यम् ॥ शुभाङ्के । नागोऽसौ । मान्यं पुण्यम् ।

* * * *

कुलेन रम्यो . . . . पुण्यो मे गोलके प्राज्ञ । धीरसङ्गो भद्रसेनः ॥

रविमन्दपदक्रम् ॥

१. ९. अ. ८. ग. ७. लिप्ति. ६.
२. १७. अ. ९. ग. ७. ९.
३. २६. अ. ८. ग. २. ६.
४. ३४. अ. ९. ग. २. २१.

* * * *

२३. ४९८. अ. १. ग. ०. ०.
२४. ४६९. अ. ०. ग. ०.

इति शनिमान्दपदकस्समाप्तः ॥

रवेर्लक्षपदम् ॥

. . . . . तस्मिन्मान्योनकाली ।
अयुत, तुङ्गो यज्ञस्तुत्यो भानुः ।
स, अयं तुङ्गो शूरो हि ।
श, सङ्गगङ्गाहिनता (नीला) ।

End:

राहोर्लक्षपदम् ॥

पूर्वो भर्गो हि स्कन्दः ।

* * * *

ए, पुण्याङ्गम् ।
गतभ्रुवम्, तुङ्गाङ्गो मे गिरा हीनः ।

* * * *

No. 13407. गणितप्रकाशिका, आन्ध्रटीकासहिता.
GAṆITAPRAKĀŚIKĀ WITH TELUGU MEANING.

Substance, paper. Size, 9 × 6 inches. Pages, 10. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Līlāvatī 6*a*.

Complete.

An alphabetical list of mathematical words with meaning in Telugu.

Beginning:

अङ्कम्, अङ्कपाशम्, अङ्गुलम्, अन्तम्, अंशम्, अंशसवर्णनम्, अन्त्यम्, अन्तरम्, अघनम्, अजः, अजिनः, अणुधान्यम्, अतिधृतिः, अनणुधान्यम्, अन्वितम्, अनुबन्धम् ।

End:

क्षुण्णम्, क्षेत्रम्, क्षेपम्, क्षिप्तम् ॥

No. 13408. गणितसारसङ्ग्रहः, सटीकः.
GAṆITASĀRASAṄGRAHAḤ WITH COMMENTARY.

Pages, 105. Lines, 27 on a page.

Begins on fol. 1*a* of the MS. described under No. 5174.

Contains the Vyavahāras one to four complete and the first stanza of the fifth Vyavahāra.

A work in arithmetic and mensuration, by a Jaina named Mahāvīrācārya. A critical edition of the work with its English translation has been brought out as a publication of this Library.

Beginning:

प्रणिपत्य वर्धमानं विद्यानन्दं विश्वगुणनिलयम् ।
सूरिं च महावीरं कुर्वे तद्गणितशास्त्रसद्वृत्तिम् ॥
अलङ्घ्यं त्रिजगत्सारं यस्यानन्तचतुष्टयम् ।
नमस्तस्मै जिनेन्द्राय महावीराय तायिने ॥

यस्य त्रिजगत्सारं निरावरणत्वादनन्यसाधारणत्वाच्च लोकत्रयसारं त्रिजगद्भव्याराध्यमित्यर्थः । अनन्तचतुष्टयम् अनन्तदर्शनज्ञानसुखवीर्याणि च । अलङ्घ्यम् आप्ताभासागम्यमतलभ्यमस्ति । तायिने धर्मोपदेशत्वेन भव्यत्राणाय तस्मै महावीराय वर्धमानस्वामिने जिनेन्द्राय एकदेशेन कर्मारातीन् जयन्तीति जिना असंयतसम्यग्दृष्ट्यादयस्तेषामिन्द्रः स्वामी तस्मै नमः ।

सङ्ख्याज्ञानप्रदीपेन जैनेन्द्रेण महात्विषा ।
प्रकाशितं जगत्सर्वं येन तं प्रणमाम्यहम् ॥

जैनेन्द्रेण जिनप्रणीतेन महात्विषा बहुप्रकाशेन येन सङ्ख्याज्ञानप्रदीपेन गणितशास्त्रज्योतिषा सर्वं षड्द्रव्यसमुदायरूपं जगत्प्रकाशितं तमहं प्रणमामि ।

प्रीणितः प्राणिसस्यौघैः नीरीतिर्निरवग्रहः ।
श्रीमतामोघवर्षेण येन स्वेष्टहितैषिणा ॥

* * * *

पापरूपाः परा यस्य चित्तवृत्तिहविर्भुजि ।
भस्मसाद्भावमीयुस्तेऽवन्ध्यकोपो भवेत्ततः ॥

* * * *

वशीकुर्वन् जगत्सर्वं स्वयं नानुवशः परैः ।
नाभिभूतः प्रभुस्तस्मात् अपूर्वमकरध्वजः ॥

* * * *

यो विक्रमक्रमक्रान्तचक्री चक्रकृतक्रियः ।
चक्रिकाभञ्जनो नाम्ना चक्रिकाभञ्जनोऽञ्जसा ॥

* * * *

यो विद्यानद्यधिष्ठानो मर्यादावज्रवेदिकः ।
रत्नगर्भो यथाख्यातचारित्रजलधिर्महान् ॥

* * * *

विध्वस्तैकान्तपक्षस्य स्याद्वादन्यायवेदिनः ।
देवस्य नृपतुङ्गस्य वर्धतां तस्य शासनम् ॥

* * * *

लौकिके वैदिके वापि तथा सामयिकेऽपि यः ।
व्यापारस्तत्र सर्वत्र सङ्ख्यानमुपयुज्यते ॥

* * * *

कामतन्त्रेऽर्थशास्त्रे च गान्धर्वे नाटकेऽपि वा ।
सूपशास्त्रे तथा वैद्ये वास्तुविद्यादिवस्तुषु ॥

* * * *

छन्दोऽलङ्कारकाव्येषु तर्कव्याकरणादिषु ।
कलागुणेषु सर्वेषु प्रस्तुतं गणितं परम् ॥

* * * *

सूर्यादिग्रहचारेषु ग्रहणे ग्रहसंयुतौ ।
त्रिप्रश्ने चन्द्रवृत्तौ च सर्वत्राङ्गीकृतं हि तत् ॥

* * * *

द्वीपसागरशैलानां सङ्ख्याव्यासपरिक्षिपः ।
भवनव्यन्तरज्योतिर्लोककल्पाधिवासनाम् ॥

* * * *

नारकाणां च सर्वेषां श्रेणिबन्धेन्द्रकोत्कराः ।
प्रकीर्णकप्रमाणाद्या बुध्यन्ते गणितेन ते ॥

* * * *

प्राणिनां तत्र संस्थानमायुरष्टगुणादयः ।
यात्राद्याः संहिताद्याश्च सर्वे ते गणिताश्रयाः ॥

* * * *

बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरे ।
यत्किञ्चिद्वस्तु तत्सर्वं गणितेन विना न हि ॥
तीर्थकृद्भ्यः कृतार्थेभ्यः पूज्येभ्यो जगदीश्वरैः ।
तेषां शिष्यप्रशिष्येभ्यः प्रसिद्धाद्गुरुपर्वतः ॥
जलधेरिव रत्नानि पाषाणादिव काञ्चनम् ।
शुक्तेर्मुक्ताफलानीव सङ्ख्यानीव(ज्ञान)महोदधेः ॥
किञ्चिदुद्धृत्य तत्सारं वक्ष्येऽहं मतिशक्तितः ।
अल्पं ग्रन्थमनल्पार्थं गणितं सारसङ्ग्रहम् ॥
संज्ञाम्भोभिरथो पूर्णे परिकर्मोरुवेदिके ।
कलासवर्णसंरूढलुठत्पाठीनसङ्कुले ॥

* * * *

प्रकीर्णकमहाग्राहे त्रैराशिकतरङ्गिणि ।
मिश्रकव्यवहारोद्यत्सूक्तिरत्नांशुपिञ्जरे ॥

* * * *

क्षेत्रविस्तीर्णपाताले खाताद्यसिकताकुले ।
करणस्कन्धसम्बन्धच्छायावेलाविराजिते ॥
गणकैर्गुणसम्पूर्णैस्तदर्थमणयोऽमलाः ।
गृह्यन्ते करणोपायैः सारसङ्ग्रहवारिधौ ॥

* * * *

न शक्यतेऽर्थो बोद्धुं यत् सर्वस्मिन् संज्ञया विना ।
अदावतोऽस्य शास्त्रस्य परिभाषाभिधास्यते ॥
* * * *

Colophon:

इति सारसङ्ग्रहे गणितशास्त्रे महावीराचार्यस्य कृतौ प्रथमो व्यवहारः समाप्तः ॥

इति कृतौ सकलासवर्णो नाम द्वितीयव्यवहारः समाप्तः ।

इति कृतौ प्रकीर्णको नाम तृतीयव्यवहारः ॥

End:

पञ्चाष्टत्रिहस्तव्यासायामोदयायामेकस्यां वाप्यां षड्वाहप्रमाणं जलं दृष्टम्, सप्तषष्टिपञ्चहस्तव्यासायामोदयासु नवसु वापीषु जलं कियद्भवति । अत्र स्थितषडङ्कलाभमन्यस्थानं नीत्वा लघुराशिना महाराशौ भक्ते 7/5, 60/8, 5/3, 9/16, लब्धजलवाहः 945 एवं त्रिपञ्चसप्तनवराशिकाः ॥

Colophon:

इति सारसङ्ग्रहे गणितशास्त्रे महावीराचार्यस्य कृतौ त्रैराशिकं नाम चतुर्थव्यवहारः ॥

पूर्वछन्ती सव्याख्यानं समाप्तम् ॥
प्राप्तानन्तचतुष्टयान् भगवतस्तीर्थस्य कर्तॄन् जिनान्
सिद्धान् शुद्धगुणान् त्रिलोकमहितानाचार्यवर्यानपि ।
सिद्धान्तार्णवपारगान् भवभृतो नेतॄनुपाध्यायकान्
साधून् सर्वगुणाकरान् हितकरान् वन्दामहे श्रेयसे ॥

No. 13409. गणितसारसङ्ग्रहः.
GAṆITASĀRASAṄGRAHAH.

Pages, 34. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5170
Breaks off in the second Vyavahāra.
Same work as the above.

No. 13410. गणितसारसङ्ग्रहः कर्णाटकटीकासहितः.
GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, (Śrītāla). Size, 17¾ × 1¾ inches. Pages, 50. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.
Contains the Vyavahāras 1 to 4.
Same work as the above and with meaning in Kanarese.

No. **13411.** गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 56. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Contains up to Bhāgahāra in the Parikarmavyavahāra. Pages, 29 to 59 are found written throughout in Kanarese.

Same work as the above

No. **13412.** गणितसारसङ्ग्रहः, सव्याख्यः.
GAṆITASĀRASAṄGRAHAḤ WITH COMMENTARY.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{2}$ inches. Pages, 234. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains the Vyavahāras 1 to 4 only.

Same work as the above.

No. **13413.** गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{2}$ inches. Pages, 364. Lines, 20 on a page. Character, Dēvanāgarī and Kanarese. Condition, good. Appearance, new.

Contains the fifth Vyavahāra only.

This is the 2nd volume of the work described above. The Kanarese commentary is designated as Bālabōdhinī, and its author is Daivajña-vallabha.

No. **13414.** गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 260. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete.

Same work as the above. It is accompanied with Ṭīkā (meaning) in Kanarese which is called Bālabōdha The name of the author of the work is Daivajñavallabha.

Beginning:

सिद्धेभ्यो निष्ठितार्थेभ्यो वरिष्ठेभ्यः कृतादरः ।
अभिप्रेतार्थसिद्ध्यर्थं नमस्कुर्वे पुनः पुनः ॥
इतः परं क्षेत्रव्यवहारषष्ठगणितमुदाहरिष्यामः ॥

तद्यथा—

क्षेत्रं जिनप्रणीतं फलाश्रयाद्व्यावहारिकं सूक्ष्ममिति ।
भेदाद्द्विधा विचिन्त्य व्यवहारं स्पष्टमेतदभिधास्ये ॥

* * * *

त्रिभुजचतुर्भुजवृत्तक्षेत्राणि स्पष्टभेदभिन्नानि ।
गणितार्णवपारगतैराचार्यैः सम्यगुक्तानि ॥

* * * *

त्रिभुजं त्रिधा . . . नं चतुर्भुजं पञ्चधाष्टधा वृत्तम् ।
अवशेषक्षेत्राणि ह्येतेषां भेदभिन्नानि ॥

* * * *

Colophon:

इति करणानुयोगशास्त्रदैवज्ञवल्लभाख्येन विरचिते क्षेत्रगणिते सूक्ष्मफलाध्यायस्य वर्णा एकादशीयभाषामयटीकायां बालबोधाख्या सम्पूर्णः(र्णा) ॥

End:

पञ्चकृतेर्वर्गो दशगुणितः करणिर्भवेदिदं सूक्ष्मम् ।
स्थूलमपि पञ्चसप्ततिरेतत्को वृत्तविष्कम्भः ॥

No. 13415. गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, paper. Size, $8\frac{3}{4} \times 6\frac{1}{2}$ inches. Pages, 311. Lines, 19 on a page. Character, Kanarese. Condition, good. Appearance, new.

Text complete; but the Vyavahāras five to eight only are accompanied with meaning in Kanarese.

Same work as the above.

No. 13416. ग्रहभाष्यम्.
GRAHABHĀṢYAM.

Substance, palm-leaf. Size, $8\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first Adhyāya complete.

This treatise purports to give the duration of time of the influence of each of the 28 constellations including the constellation called Abhijit, of each of the nine planets and of each of the 7 days of a week.

Beginning:

विनायक नमस्तुभ्यं सततं मोदकप्रिय ।
अविघ्नं कुरु ते(मे)देव सर्वकार्येषु सर्वदा ॥
ग्रहभाष्यमिदं शास्त्रं विचित्रं लोकपूजितम् ।
अष्ट(ा)विंशतिऋक्षाणां नवानां तु ग्रहं तथा ॥
* * * *
सर्वेषां घटिका नित्यं नव भागानि निर्णयेत् ॥
आदित्यचन्द्रभौमश्च सौम्यश्च गुरुशुक्रयोः ।
मन्दान्तं सप्त वाराणि एतेषु दिननिर्णयम् ॥

End:

भृगोः ॥

हेमवस्त्रा . . . : . . गन्धानुलेपनम् ।
मृष्टान्नभोजनं प्राप्तं शुक्रनाड्य(ाः) फलं भवेत् ॥
वारवर्गफलं दृष्ट्वा राजराजन्यस्य पूजितम् ।
फलाफलमिदं पृच्छन् सर्वकर्म प्रशस्यते ॥

Colophon:

इति ग्रहभाष्ये प्रथमोऽध्यायः ॥



No. **13417.** ग्रहलाघवम्, सव्याख्यानम्.

GRAHALĀGHAVAM WITH COMMENTARY.

Pages, 171. Lines, 30 on a page

Begins on fol. 1*a* of the MS. described under No. 13397.

Complete.

Same text as that described under R. No. 913 of the Triennial Catalogue of MSS., Vol. II, Part I-A. By Gaṇēśa of Nandigrāma and son of Kēśava of Kauśikagōtra. The commentary is by Mallāri, son of Divākara of Gōlagrāma on the banks of the Gōdāvari.

Beginning:

श्रीगणेशदैवज्ञकृतो ग्रहलाघवाख्यतन्त्रः श्रीमल्लारिकृतोपपत्तिव्याख्यानयुता लिख्यते ।

यथा —

नाके नाकेशमुख्यास्सुरवरनिवहास्सन्ति येऽनन्तसङ्ख्याः
नाख्याऽया(मा)ख्या(त्य)मीषां[ख्या] कथमपि च मनःपूर्वकं वाङ्मदीया ।
पङ्कः(एकं)हित्वैकदन्तं सकलसुरशिरस्सङ्घसङ्घर्षिताङ्घ्रि
शीघ्रं भक्तेष्टसिद्धिप्रदमिह हि सुरं सादरं तं नमामि ॥

मल्लारिं कुलनायकं रविमुखान्खेटांश्च नत्वा गुरोः
स्मृत्वा पादयुगं ह्यवाप्य च ततः किञ्चित्सुबोधात्मकम् ।
मल्लारिर्ग्रहलाघवस्य कुरुते टीकां लसद्वासनां
यस्मादल्पमतिश्च कुण्ठितमतिस्स्यात्पूर्ववैचित्र्यतः ॥

मध्यस्फुटास्तोदयवक्रपूर्वं कर्माखिलं यद्गणिते खगोत्थम् ।
जीवाधनुर्ना(स्सं)श्रयकं विना ते न स्यादयं निश्चयमेव गोले ॥

कथमत्र कृतं विना धनुर्ज्यें खरकर्माखिलमल्पकर्मणा ।
उपपत्तिविचारणाविधौ गणका मन्दधियो विमोहिताः ॥

तस्माद्ब्रूम्युपपत्तिमस्य विमलां तन्मोहनाशाय तां
ज्ञात्वा मे मतिकौशलं सुविगलं पश्यन्तु तुष्यन्तु ते ।
हे वर्या गणका विलोक्य यदिहाशुद्धं च संशोध्यतां
किं वा प्रार्थनया परोपकृतिषु स्वाभाविकस्तद्गुणः ॥

* * * *

अथ श्रीमज्जलधिनिकटस्थितनानोपवनविराजितनन्दिग्रामाभिधाननगरनिवासी सकलभूपतिसेवितचरणयुगलकमलः गणिताटवीविघटनपटुतराखिलदैवविन्मातङ्गकुम्भपाटनोत्कण्ठकण्ठीरवः श्रीमदुमारमणचरणद्वयपङ्कजाप्तमहामतिवैभववेदवित्केशवदैवज्ञात्मजः गणेशदैवज्ञवर्यः ग्रहलाघवाख्यं ग्रहकरणं चिकीर्षुः तत्रादौ निर्विघ्नेन ग्रन्थसमाप्तिप्रचयगमनाभ्यां

* * * *

वस्तुनिर्देशरूपमङ्गलसहितं ग्रन्थारम्भं वसन्ततिलकवृत्तेनाह—

(मू) ज्योतिःप्रबोधजननी परिशोध्य चित्तं तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायैर्व्यक्तीकृता जयति केशववाक्छ्रुतिश्च ॥

(व्या) श्रुतिः वेदः सर्वोत्कर्षेण वर्तते । तां विशेषणद्वारा स्तौति । किंविशिष्टा । केशवस्य विष्णोर्वाक् । यस्य निश्वसितं वेदा इत्युक्तत्वात् । .

. . . गहना अर्थपूर्णा स्वल्पाक्षरा च । तदंशाः तच्छिष्याः । तैः कृता ये उपायाः टीकाद्याः । तैः प्रकटीकृता ॥

अथ यथार्थभक्तैः रामस्मरणं कर्तव्यम्, गणकैः करणस्मरणं कर्तव्यमित्यादि विषमवृत्तेनाह—

(मू) परिभग्नसमौर्विकेशचापं दृढगुणहारलसत्सुवृत्तबाहुम् ।
सुफलप्रदमात्तसप्रभं तत् स्मर रामं करणं च विष्णुरूपम् ॥

(व्या) . . . .

(मू) यद्यप्यकार्षुरुरवः करणानि धीरा-
स्तेषु ज्यकाधनुरपास्य न सिद्धिरस्मात् ।
ज्याचापकर्मरहितं सुलघुप्रकारं
कर्तुं ग्रहप्रकरणं स्फुटमुद्यतोऽस्मि ॥

(व्या) . . . .

(मू) व्यब्धीन्द्रो १४४२ नितशक ईश ११ हृत्फलं स्या-
च्चक्राख्यं रवि १२ हतशेषकं च युक्तम् ।
चैत्राद्यैः पृथगमुतस्सदृग्घ्र २ चक्रा-
द्दि १० ग्युक्तादमर ३३ फलाधिमासयुक्तम् ।
खात्रि ३० घ्नं गततिथियुङ्निरग्रचक्रा-
ङ्गांशाढ्यं ६ पृथगमुतोऽब्धिषट्क ६४ लब्धैः ।
ऊनाहैर्वियुतमहर्गणो भवेद्वै
वारस्स्याच्छर ५ हतचक्रयुग्गणोऽब्जात् ॥

and :

(अव) अथ ग्रन्थालङ्कारमाह—

(मू) पूर्वे प्रौढतराः कचित्किमपि यच्चक्रुर्धनुर्ज्ये विना
ते तेनैव महातिगर्वकुभृदुच्छृङ्गेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघु कृतं हित्वा धनुर्ज्ये मया
तद्गर्वो मयि मास्तु किं न तदहं तच्छास्त्रतो वृद्धधी ॥

(अव) स्वस्थितिनामादीनि कथयति—

(मू) नन्दिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत्कौशिकगोत्रजः सकलसच्छास्त्रार्थवित्केशवः ।

सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धावबोधांशकः
स्पष्टं वृत्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत् ॥

Colophon:

(व्या) . . . .

देशे सार्थसमाह्वयेऽतिरुचिरे तीरे च गोदोत्तरे
गोलग्रामपुरे पुरारिचरणार्चासक्तविद्वद्वृते ।
आसीत्तत्र दिवाकरोऽतिचतुरो दैवज्ञसङ्घाग्रणी-
र्विश्वेशः सततं यदीयहृदये यस्तस्य पुत्रोऽकरोत् ॥
मल्लारिर्गणकाग्रणीर्गुरुपदद्वन्द्वस्य भक्तेरतो
लब्ध्वा बोधलवस्ततो हि विवृतिं सार्थोपपत्तिं स्फुटम् ।
कर्णस्य ग्रहलाघवस्य गणकश्रीमद्गणेशाभिध-
प्रोक्तस्याथ विलोकयन्तु सुधियः पश्यन्तु तुष्यन्तु माम् ॥

The scribe adds—

बाणोनाभिकतः कुरामविहृतान्मूलं हि मासास्सयु-
ग्बाणैर्भाश्च दशोनितं दिनमिति तस्यादलस्यावधिः ।
पक्षस्यात्तिथिसम्मितोऽखिलयुतिः सप्ताब्धितिथ्यन्विता
हेनाख्ये गणकालिलेख च तदा टीकां पराधस्त्विमाम् ॥
अङ्गेभाद्रिशशाङ्क १७८६ शाकरुधिरोद्गार्यब्दके सौम्यगे
गोले पूषणि ज्येष्ठकृष्णचवतीशुक्रोत्तराषाढभे ।
हारीतान्वयजो लिलेख गणकानन्दाख्यकोशं स्वकं
श्रीमद्वेङ्कटकृष्णरायगणको दैवज्ञवृद्ध्यै स्फुटम् ॥

No. 13418. ग्रहलाघवसारिणी.

GRAHALĀGHAVASĀRIṆĪ.

Substance, paper. Size, $13\frac{1}{3} \times 6\frac{7}{8}$ inches. Pages, 37. Lines, 14 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

Incomplete.

This is a short work based on the Grahalāghava of Gaṇēśa, son of Kēśava; by Prēmamiśra. It was composed in Śaka 1578, i.e., 1656 A.D. at Madhupura. It consists of two portions: Kriyā and Krama. The former contains nine stanzas and the latter consists of astronomical

tables. At the beginning five stanzas (introductory) and the Saṁskārāṇi (three verses) are extracted from the Grahalāghava According to one of the stanzas the date of the Grahalāghava is given as Śaka 1442, corresponding to 1520 A.D.

Beginning:

ज्योतिःप्रबोधजननी परिशोध्य चित्तं तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायैर्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥

* * * *

इति संस्काराणि ॥

अथ प्रेममिश्रकृतग्रहलाघवसारिणीमाह । उक्तं च—
नत्वा गणेशस्य पदारविन्दं हरिं च सूर्यप्रमुखान् ग्रहांश्च ।
प्रेमो प्र(ग्र)हार्थी ग्रहलाघवस्य लघुक्रियां सारणिकां प्रकुर्वे ॥
अहर्गणं श्रीग्रहलाघवोक्तं कृत्वा बुधैः खाग्नि ३० मितैर्विभाज्यम् ।
लब्धं पुनर्द्वादश १२ भिर्विभज्य शेषास्त्रयोऽङ्का ध्रुवसंज्ञकास्स्यु ॥

* * * *

गजाद्रीषुचन्द्रै १५७८ मिते शाककाले द्वितीया २ रवौ मासपौषे च शुक्ले ।
नगर्याममोः श्रीगणेशप्रसादात् बुधीः प्रेमनामाकरोत्सारिणीं हा ॥

Colophon:

इति श्रीप्रेममिश्रकृतौ ग्रहलाघवस्य सारिणीक्रियाविवरणं समाप्तम् ॥

अथ सारिणीक्रमो लिख्यते—

चक्राहर्गणाः ४०१९ त्रिशत्शेषाङ्काः

0	1	2	3	4	5	[illegible]	7	[illegible]	9	10	11	12	13	14	15	1	1	18	19	20	21	22	23	24	25
0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	0	[illegible]
0	0	1	2	3	1	5	6		[illegible]	9	10	11	12	13	14	15	16	17	18	1[illegible]	20	21	22	23	24
[illegible]	59	58	57	56	5[illegible]	4	[illegible]3	2	1	50	49	[illegible]8	47	46	4	[illegible]4	43	42	41	0	39	38			
8	8	16	24	32	40	49	57	5	13	21	29	38	46	2	10	18	27	35	[illegible]3	51	59	7	26	24	3[illegible]
10	10	20	31	41	51	1	12	22	3	[illegible]3	53	3	13	23	34	[illegible]4	54	5	15	25	3	46	56	7	17

End:

61	62	63	4	[illegible]	66	67	8	6	70	71	72	73	74	75	76	[illegible]	78	79	80	81	82	8[illegible]
20	21	21	21	21	21	21	22	22	22	22	22	22	23	23	23	23	23	23	23	23	23	23
49	2	14	2[illegible]	37	43		1[illegible]	18	27	3[illegible]	4[illegible]	52	[illegible]	7	14	20	29	31	37	41	44	48
56	22	48	5	24	42	45	49	52	13		44	54	24	55	10	23	39	27	17	7	37	5

No. 13419. ग्रहस्फुटम्, आन्ध्रटीकासहितम्.

GRAHASPHUṬAM WITH TELUGU MEANING.

Pages, 3. Lines, 24 on a page.

Begins on fol. 84*a* of the MS. described under No. 13397.

Incomplete.

This work lays down the method of finding out the exact position of each of the nine planets on a specified day

Beginning:

खरसा (६०) ऋषिनेत्रघ्न(।): (२७) गतवत्सरसंयुता: ।
नन्दाभ्रभूमि (१०९) मिर्युक्ता भवेयु: शकवत्सरा: ॥
धूसीकालयुतं शाकं कल्यब्दमिति कथ्यते ।
चरभयरहितं शकस्य वर्षे शककुलशङ्कुशताण्डसंप्रवृद्धम् ।
सहृद्यदि गणयेत्तदादि शुक्रात ननु मृगवानभयेन राजचापै: ॥
कल्याद्यहर्गणैर्योज्यं मासवाक्यं तत: क्रमात् ।
इच्छादिनेन संयुक्त: शुक्रताराद्यहर्गण ॥

End:

रविस्फुटम्—

गतमासं गतदिनं स्थाप्य संक्रान्तिशेषकम् ।
निशासंक्रमणे युञ्ज्याद्दिवासंक्रमणे त्यजेत् ॥
तेनु योग्यादिवाक्योनं सूर्यस्फुटमितीरितम् ।
चन्द्रं स्थाप्य रविं त्यक्त्वा भोजयित्वा च षष्टिघाम् ॥
शशाङ्कस्य गतौ सूर्यगतिं त्यक्त्वा प्रयुज्य च ।
एताभ्यां विहतौ पूर्वौ तिथियोगौ भविष्यत: ॥

No. 13420. चरणाध्याय:.

CARAṆĀDHYĀYAḤ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 4. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 23*a*. The other works herein are Dāmōdarīya 1*a*, Ravyādicakra 19*a*, Daśāntardaśāphala 25*a*.

Incomplete.

Gives the month and the year of the solar and the lunar eclipses occurring during a certain Hindu cycle of 60 years and states whether these eclipses are full or partial, etc.

Beginning:

अवाग्भवे भाद्रपद्यां ग्रहः पूर्णोऽधिको मधुः ।
माघेऽर्धग्रहणं भानोः फाल्गुन्यां पादमात्रकम् ॥
प्लवङ्गनामके वर्षे ग्रहशङ्कापि नास्ति हि ।
. . . . . . मासि भाद्रपदाधिके ॥
सौम्यवर्षेऽपि चाषाढ्यां पौष्यां चूडामणिर्ग्रहः ॥

End:

आषाढमास्यधिकताश्विनि पूर्णिमायामर्धग्रहस्सुरगुरोर्दिवसे सुधांशौ ।
तस्मिंश्च मासि दिवसेऽपि च तस्य भानोरर्धग्रहो निगदितः समभूद-
[मायाम् ।
